द्वादशी न स्यात्त्रयोदश्यां यदा मुने । उपोष्या दशमीमिश्रा सर्वैरेकादशी तदा । तथा नारदीपुराणेप्याह ।
त्रयोदश्यां यदा न स्याद्द्वादशी घटिकाद्वयं । दशम्येकादशी मिश्रा सेवोपोष्या सदा तिथिः ॥ यत्तु नघटिका
दशमी शेषसंयुक्तामुपोष्यैकादशीं नरः । संवत्सरकृतं नष्टं धर्मं परिमुच्यते ध्यादित त्रयोदश्यां
द्वादशी सद्भावे दशमी विद्धैकादश्युपवासप्रतिषेधपरं बोद्धव्यं । तथा च विष्णुपुराणे । एकादशीं द
शाविद्धां वर्धमानां विवर्जयेत् । पत्र जहाति सो स्थितसामलीयं दशमी युतामिति वचनात् । यदा तु द
शमी विद्धैकादशी द्वादशी तु शुद्धा त्रयोदश्यां तु द्वादशी किंचिन्मात्रा दृश्यते । तदा शुद्धा द्वादश्येव
निःकामैः सर्वैरुपोष्या । शुद्धैव द्वादशी राजन्नुपोष्या मोक्षकांक्षिभिरिति वचनात् । सकामैस्तु
पूर्वोपोष्या । यदुक्तं विष्णुरहस्ये । निष्कामस्तु गृही कुर्यादुत्तरैकादशीं सदा सकामस्तु सदा पूर्व

Indira Gandhi National
Centre for the Arts

मितिबौधायनोऽब्रवीत् ।यदुक्तं स्कंदपुराणे। शुद्धैव द्वादशी याप्यापरतो द्वादशी यदि वाराहपुरा
णेप्युक्तं ।एकादशी विलुप्ता च परतो द्वादशी स्थिता उपोष्या द्वादशी तत्र यदीच्छेत्परमं पदं ।द्वादश्या
मुपवासं तु ये कुर्वंति नराः क्ष्मामामेव पश्यंति मम व्रतपरायणाः४ भविष्यत्पुराणेपि ।दशम्यागामि
मदन० तापस्वा लुप्यतैकादशी यदा उपोष्या द्वादशी तत्र न दशम्या कथंचनेति। वचनजातं तत्सकलमपि यत्यादि
विषयं। यदा च दशमीविद्धैकादशी द्वादश्यां च किंचिन्मात्रा निःसरति द्वादशी च त्रयोदश्यां न विद्यते तत्
दापि सर्वेषां द्वितीयैकादश्यामेवोपवासः४ ननु कलाकाष्ठामुहूर्तं वा यदि चेन्न परेहनि।द्वादश २०
२० द्वादशी हित्वा त्रयोदश्यां तु पारणं। इति त्रयोदशीपारणप्रतिषेधात्कथं तस्यामुपोषणं। उच्यते।।
दशमीशेषसंयुक्ता गांधार्या समुपोषिता। तस्याः पुत्रशतं नष्टं तस्मात्तां परिवर्जयेदित्यादिवचनैर्द
शमीवेधस्य प्रतिषेधात्। अकर्तव्यं नाविनि अनंतरप्रतिषेधवाचात्तत्र लाघवात् त्रयोदशीपारणप्रतिषेध
बाधव युक्ता। दशमीविद्धोपवासप्रतिषेधवाक्यसाति।। एकादशी तथा षष्ठी अमावास्या चतुर्थिका।।

उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुता इत्यस्य चैव बाधप्रसंगात्। तथापि स्मरीति सर्वैरेकाद
शी कार्या द्वादशीमिश्रिता नरैः। प्रातर्भवेद्धि मा वा भूद्यतो नित्यमुपोषणं। एकादशीमुपोषेत
द्वादशीमथवा पिवा। विमिश्रां वापि कुर्वीत न दशम्या युतां क्वचिदिति पारणविषयप्युक्तं। कला
प्येकादशी यत्र परतो द्वादशी न चेत्। तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणमिति। तस्माद्यानि
वाक्यानि त्रयोदश्यां द्वादशीभावानुवादेन पारणप्रतिषेधकानि तेषां द्वादशीमार्गमतिक्रम्य
पारणं न कर्तव्यं किंतु पूर्वमेवेत्येव तात्पर्यं विवेचनीयं। दशमीवेधश्च स्वउदयात्स्मन्त्यवयाघः।।
यदुक्तं गोभिलेन। विद्धा यत्रोदयात्पूर्वं दशम्येकादशी तिथिः४ दानवेभ्यः श्रीणानाय दत्तवान्पाक
शासनः४।। यदा तु पूर्वैकादशी दशमीविद्धा उत्तरैकादशी तु द्वादशीं नाभिशेषं त्रयोदश्यां तदा द्वा
दशीं विद्धसंयुक्तामेकादशीं परित्यज्य गृहस्थव्यतिरिक्तैः सर्वैरुत्तरैवोपोष्या।। यदुक्तं सौरध
र्मोत्तरे। एकादशी द्वादशी च रात्रिशेषे त्रयोदशी।। त्रिस्पृशा सा तिथिः प्रोक्ता सर्वपापहरा स्मृता।।

Indira Gandhi National Centre for the Arts.

उपवासः कृतस्तत्र सर्वपातकनाशनः॥ भविष्यपुराणे। द्वादश्यासंयुता यत्र भवत्येकादशी कला। दिन
त्रयेऽपि सा पुण्या न दशम्या कथंचन। त्रिस्पृगेकादशी यत्र तत्र संनिहितो हरिः॥ पुण्यं क्रतुशतस्योक्तं
त्रयोदश्यां तु पारणा॥ अत एव त्रयोदशी पारणाप्रतिषेधवाक्यं तु द्वादश्यां संभवत्यां तामतिक्रम्य
मदन त्रयोदशी पारणाऽवगंतव्यमिति। विद्यमानायां द्वादश्यां स्नानदेवार्चनादिना नोल्लंघनीया। यदाह
नारदः॥ अल्पायामथ विप्रेंद्र द्वादश्यामरुणोदये। स्नानार्चनक्रियाः कार्या दानहोमादिसंयुताः।
एतस्मात्कारणात् द्विप्र प्रत्यूषस्नानमाचरेत्। पितृतर्पणसंयुक्तं स्वल्पाछेयां तु द्वादशी। मह
२१ हानिकरा ह्येषा लंघिता द्वादशी नृणां। करोति च महाहानिं मत्स्यानेव सरस्वती। यत्पुनस्त्रिस्पृशाया २१
एकादश्या उपोष्यत्वमुक्तं तन्मोक्षार्थिनां संन्यासिनामुपवासाधिकारोऽवगम्यते न गृहस्थानां
तेषां त्रिस्पृगेकादश्यामुपवासनिषेधात्। यदाह एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। त्रिस्पृ
शेत दहोरात्रेनोपोष्यं तु सुतार्थिभिः॥ तदा एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। उपवासं न कु
र्वीत पुत्रपौत्रसमन्वितः॥ इत्यादिवचनेर्गृहस्थस्योपवासनिषेधस्मरणात्॥ ० ॥

अतः स्वदशमीविद्धैकादश्यां गृहस्थस्योपवासः॥ यत्पुनर्वचनं॥ एकादशी यदा विद्धा द्वादशी न जयेयदा।
आगमासा द्वादशी इयान्मंत्रविधी यत इति तद्दशक्तस्योपवासासंभवे इयं। यदा च दशमीविद्धैका
दश्यां न विद्यते द्वादशी च समानानावा तदा दशमीविद्धैकादश्येव यतिव्यतिरिक्तैरुपोष्या। शुद्धै
कादश्यास्त्वलाभात् प्रकारांतराभावाच्च। तथा च स्मरणं। त्रयोदश्यां न लभ्येत द्वादशी यदि किंचन।
उपोष्यैकादशी तत्र विद्धापि दशम्या मुने। नन्वविद्धानामलाभेनुपपादविफलानि वा सकृद्वा
अश्नीयादुपवासः कृतो भवेदिति वचनस्य का गतिरिति चेत्। अविद्धानि निषिद्धस्य न लभ्यंते दिना
नि तु मुहूर्तैः स्पृष्टानि विद्धा ग्राह्यैवैकादशी तिथिः इति वचनानुरोधेन जलादिप्राशनमेकादशीव्य
तिरिक्तविषयमवगंतव्यमिति। इदं चैकादशीव्रतं यदा व्याधिना शरीरासामर्थ्यं तदा पुत्रादिकं कार
येत् तदुक्तं वाराहपुराणे॥ असामर्थ्ये शरीरस्य व्रते च समुपस्थिते। कारयेद्धर्मपत्नीं वा पुत्रं वा वि
नयान्वितं। तथा स्कंदपुराणे। भार्या भर्तुर्व्रतं कुर्याज्जाया यायीस्वपतिस्तथा। असामर्थ्ये तयोस्त्वन्यो व्रतभंगो
न जायते॥ २

Indira Gandhi National
Centre for the Arts

अत्रैकादशीनिर्णये विज्ञानेश्वरसंगृहीताः श्लोका लिख्यंते ॥ शुद्धा मिश्रा दशम्याद्यैः स्यादपि वर्तते तो चैवमेकादशी यै
प्रत्येकं वत्रिचास्ये पुनरपि सम्मतान्यूनता विकययोगात् । प्रजाः प्रत्येकभिन्नाः पुनरपि षडमी द्वादशी ॥
न्यूनताद्यैः स्वैवं चाद्यैवमष्टादश खलु मिलिता कल्पनाः संभवीति ॥ १ ॥ संपूर्णैकादशी या न भवति परतः
मदन० साम्यमावास्यमावान्यूना वा यास्तिवा यैव जाति हरिदिनं द्वादशी सापि वा द्वौ स्वैवं कुर्युः परस्तादुपवस
नमथ द्वादशी नाद्यमेति प्रज्ञाऽत्र द्वितीयामुपवसतु जनाः पूर्वमन्ये तु सर्वे ॥ २ ॥ यद्यथवा पूर्वविद्धा
न भवति परतः साम्यमावास्यमावा सर्वे कुर्युर्द्वितीयामथ हरिदिवसः पूर्वविद्धापि यायात् द्वादशी
२२ सा त्रिस्पृशा यदि न भवति परं मानिनः पूर्वमन्ये यद्वा विज्ञानयाद्ये परमुपरि नवत्र सर्वे पुरस्तात् ॥ २२
॥ ३ ॥ पूर्वविद्धाथ वा सा न भवति दशमी द्वादशी वापि वाढं कुर्या तत्रापरिष्टान्मुनिजननिकरः पूर्वमन्ये तु
सर्वे ॥ विद्धा तद्दशम्याहरिदिनमथ च द्वादशी राजिशेषं सर्वैः पूर्वं तदानीमुपवसतु जनः प्रीतये
केशवस्य ॥ इति श्रीमत्कारमल्लवंशोद्भवमहाराजाधिराजश्रीमदनपालविरचिते तिथिनिर्णयसारे
(एकादशीनिर्णयः ४) ॥

द्वादश्यां पारणाविधानात् मुख्येति पूर्वं तर्हि कथमेकादशी युक्तोपोष्या द्वादश्युपवासे तु त्रयोदश्यां पारणीति
त्रेधा । द्वादश्यां पारणाविधानात् । तिथिनक्षत्रनियमे तिथिना तस्य पारणामिति तिथ्यंते पारणाविधानाच्च ॥
सवणाद्वादश्यां तु विशेषतः ॥ यद्येकादश्यामेव श्रवणनक्षत्रयुता द्वादशी लभ्यते तदैकेनोपवासेन व्र
तद्वयमपि सिद्ध्यति ॥ यदा त्वेकादश्यां संपूर्णायामेवोपवासस्तदा श्रवणद्वादश्यां पृथगुपोष्यं ॥
तथा वचनं ॥ एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् । न चात्र विधिलोपः स्यादुभयोर्देवता हरि
रिति ॥ अनु असमाप्तव्रतः पूर्वेणैव कुर्यादुत्तरमिति वचनाद्द्वादश्यां पारणाभावे पूर्वव्रतस्यास
माप्तेः कथं न विलोप इति चेत् उभयोर्देवता हरिरिति वचनेनैकदेवतात्वेन नायं दोषः ॥ उपवास
द्वयासमर्थेन तु श्रवणनक्षत्रयुक्तायां द्वादश्यामुपवसनीयं ॥ तथा चैकादश्युपवासस्यापि फलं प्रा
प्नोति तदुक्तं ॥ एवमेकादशीं भुक्त्वा द्वादशीं समुपोषणात् पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्य
संशयं इति तथा वचनांतरं च ॥ उपोष्य द्वादशीं पुण्यां विष्णुऋक्षेण संयुतां । एकादश्युद्भवं पुण्यं नरः
प्राप्नोत्यसंशयं ॥ यदा त्वेकादश्यामेव श्रवणनक्षत्रं पतति तदैकादश्यामपि श्रवणद्वादशीव्रतं कार्यं ॥ ॥

Indira Gandhi National
Centre for the Arts

॥तदाह॥ याः काश्चित्तिथयः प्रोक्ताः पुण्या नक्षत्रयोगतः। तास्वेव तद्व्रतं कार्यं श्रवणद्वादशीं विना॥
तथा भविष्योत्तरेप्युक्तं॥ एकादशी यदा तु स्याच्छ्रवणेन समन्विता। विजया सा तिथिः प्रोक्ता भक्तानां
विजयप्रदा॥ तिथिनक्षत्रसंयोगे उपवासो यदा भवेत्। तावदेव न भोक्तव्यं यावन्नैकस्य संक्षयः॥ अवि
मदन० शेषान्महीपाल सर्वान्वर्ज्ये यदि। तिथिक्षये न भोक्तव्यं यावन्नैकस्य संक्षयः॥ एतावांस्तु श्रवणै
कादशी श्रवणद्वादश्योर्विशेषः॥ श्रवणैकादश्यां वामनावतारो हरिरर्चितः श्रवणद्वादश्यां तु जनार्दन २३
सैद्द इति॥ ॥इति श्रीकम्हारमल्लेत्यादि विरुदराजाधिराजमान श्रीमदनपालविरचिते तिथिनिर्णयसारे
२३ श्रवणद्वादशीनिर्णयः॥ शुक्लपक्षे त्रयोदशी तु पूर्वविद्धा ग्राह्या। त्रयोदशी प्रकर्तव्या द्वादश्या सम्हि३
तामुने। भूतविद्धा न कर्तव्या दर्शे पूर्णे कदाचन इति आपस्तम्बवचनात्। तथा कृष्णशषुवर्न॥
द्वितीया पञ्चमी वेधाच्च दशमी च त्रयोदशी। चतुर्दशी चापराह्न्युः पूर्वेद्युर्नोतथा इति। कृष्णपक्षे त्रयोद
शी तु पराविद्धोपवसे ग्राह्या। यदाह। षष्ठ्यष्टमी अमावास्या कृष्णपक्षे त्रयोदशी॥ एताः परयुताः पूज्याः
पराः पूर्वेण संयुताः इति॥ अनङ्गत्रयोदश्यपि पूर्वविद्धैव कर्तव्या॥ ॥ ॥

॥यदाह स्मीवत्तेः॥ कृष्णाष्टमी च हस्तस्या सावित्री वटपैतृकी। अनङ्गत्रयोदशी रम्भा उपोष्याः पूर्वसं
युता इति॥ ॥इति तिथिनिर्णयसारे त्रयोदशीनिर्णयः॥ अथ चतुर्दशीनिर्णयः प्रस्तूयते। त
त्र शुक्लपक्षे चतुर्दशी परा ग्राह्या। चतुर्दश्या च पूर्णिमेति युग्मवाक्यात्। शुक्लपक्षेऽष्टमी चैव
शुक्लपक्षे चतुर्दशी पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुतेति स्मरणात्। कृष्णपक्षे चतुर्दशी
पूर्वविद्धा ग्राह्या। कृष्णपक्षेऽष्टमी कृष्णपक्षे चतुर्दशीति वचनात्। शिवरात्रिचतुर्दश्यां तु वि
शेषः सा तु प्रदोषव्यापिनी उपोष्या। तदुक्तं शंखस्मृतौ। प्रदोषव्यापिनी ग्राह्या शिवरात्रि२
शिवप्रिये। रात्रौ जागरणं यस्मात्तस्मात्तामुपोषयेत्॥ ननु माघासितभूतदिनं तु सा
जन्तुर्पतित आगयदि पंचदश्यां। जया प्रयुक्ता न तु तत्र कुर्यात् शिवस्य नाम्नि प्रियकृच्छिवस्य
ति त्रयोदशी विद्धायां निषेधात्। तथा कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रिचतुर्दशी प
ताः पूर्वयुताः कार्यास्तिथ्यन्ते पारणं भवेत्॥ तथा जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव
वा पूर्वविद्धैव कर्तव्या तिथिभान्ते च पारणम्। तथा श्रावणी दुर्गानवमी दूर्वा चैव हुताशनी॥

Indira Gandhi National Centre for the Arts

पूर्वविद्धातुकर्त्तव्या।शिवरात्रिर्बलेर्दिनमिति।त्रयोदशीविद्धायाग्रहणाच्चपरस्परविरुद्धा
नीवचाक्यानिलक्ष्यंते।सत्यं।अत्रेयंव्यवस्था।त्रयोदशीयदादेविदिनयुक्तौप्रमाणा।तथ
जागरेशिवरात्रिःस्यान्निशिपूर्णाचतुर्दशीतिवचनेनत्रयोदश्या।अस्पृष्टप्रदोषा।यदाच
तुर्दशीनिशाभवतितदोपवासजागरणादिकंकर्त्तव्यम्।यदापुनस्त्रयोदशीमिश्रिताच
मदन० तुर्दशीरात्रिर्भववतितस्यांनोपोष्यमिति।जयाप्रयुक्तानतुतत्रकुर्याच्छिवस्यरात्रिमि
तित्रयोदशीसंवचस्परात्रौनिषेधात्।ततश्चव्रतदुष्टंभवति।यदाद्वितीयदिनेपारणा
यागपस्तिथ्यंतोलभ्यतेतदापूर्वापोष्या।यदापुनर्द्वितीयदिनेप्रदोषंस्पृशति।तदाद्विती
२४ यैजागरोपवासादौग्राह्या।यदापुनश्चतुर्दशीदिनद्वयेपिप्रदोषंस्पृशति।तदापुनस्त्र २४
वोपोष्या।यदिपुनःपूर्वेद्युर्वोपोष्यतेतदाद्वितीयदिनेदिवातिथ्यंताभावात्तत्ररात्रौपारणाप्रा
प्तेति।तच्चायुक्तं।रात्रौपारणस्यनिषेधात्॥यदुक्तंकालादर्शे॥सर्वेष्वेवोपवासेषुदि
वापारणमिष्यते।अन्यथापुन्महाहानिःस्याद्रात्रौपारणमिति।यत्तुसार्धस्तमानएवव्यापि

नीवेल्यंहस्ति।दिवैवपारणंकुर्यात्पारणेनैवदोषभागितितद्वचनेदिनद्वयेस्तमानादू
र्ध्वभाविचतुर्नाडीव्याप्तिविषयं।भवद्यत्रत्रयोदशीभूतव्याप्तामहानिशा।।शिवरात्रिव्र
तंकुर्याज्जागरणंतथात्वेवचनविरोधोभवतीतिचेदामेवम्।महानिशावेधोपियुक्तस्तथ
किंपुनश्चतुर्नाडीवेधइत्येतत्परंतद्वचनं।अन्यथात्रयोदश्यस्तगेसूर्येचतस्रस्त्ववन
हिलु।भूतविद्धातुयातत्रशिवरात्रिव्रतंचरेदितिवायुपुराणवचनस्यगतार्थताभावात्।।
यदापुनर्दिनद्वयेपिअस्तमानादूर्ध्वभाविचतुर्नाडीव्याप्तिश्चतुर्दश्यानास्तितदाकुत्रो
पवासइतिउच्यते।पूर्वत्रैवोपवासः।यदुक्तंब्रह्मवैवर्ते।सूर्यस्तेनवनाडीषुभूतविद्धात्र
योदशी।शिवरात्रिव्रतेतत्रकुर्याज्जागरणंतथेति।ननुशिवरात्रिव्रतेभूताकामविद्धा
विवर्जयेत।तथाजयाप्रयुक्तानतुतत्रकुर्याच्छिवस्यरात्रिंप्रियकृच्छिवस्येतिवचनाच्च
त्रोसर्वथात्रयोदशीवेधात्कथमियंव्यवस्थेतिचेत।सत्यं।प्रागुक्तवचननिर्णयपर्यो
लोचनप्रकारेत्रयोदशीसर्वेचेनद्दिनद्वयेपिप्रदोषव्यापिचतुर्दशीफलाभैरो

वः॥ तत्रैतत्कर्तव्यमिति एतद्दिवा तु परं प्रागुक्तवचनमिति बोद्धव्यं। इहापि दिवातिथ्यै
तस्यैव दिवापारणं कर्तव्यम्॥ ॥इति श्रीकष्टारमल्लेत्यादिविरुदराजी विराजमानश्री
मदन॰ मदनपालविरचिते तिथिनिर्णयसारे शिवरात्रिनिर्णयः॥ ॥अमावास्यापरविद्धा प
र्या। षष्ठ्यष्टमी अमावास्या कृष्णपक्षे त्रयोदशी। एताः परयुताः कार्याः पराः पूर्वेण संयु
ता इति वचनेन परान्वितायां उपोषणत्वकथनात्। प्रतिपद्यप्यमावास्येति युग्मवचनाच्च।
पौर्णमास्यपि परान्विता पोष्या। एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी अमावास्या
२। तृतीया च ता उपोष्याः परान्विता इति विष्णुधर्मसारात्॥ न। एतच्च सावित्रीव्रतव्यतिरिक्तवि २५
षयमित्यवगन्तव्यं॥ यदाह ब्रह्मवैवर्ते॥ भूतविद्धा न कर्तव्या दर्शपूर्णा कदाचन। वर्ज
यित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तमम्। यत्तु ब्रह्मपुराणवचनं षष्ठ्येकादश्यमावास्या पू
र्वविद्धा तथाष्टमी। पूर्णिमा परविद्धा स्यान्नोपोष्येति विपर्ययकमिति तत्सावित्रीव्रतव्यति
रिक्तविषयं। होलिका पूर्णिमा तु सायाह्नव्यापिनी ग्राह्या। सायाह्ने होलिकां कुर्यात्

पूर्वाह्णे क्रीडनं गवां। दीपं दद्यात्प्रदोषे तु पञ्चमेऽस्मिन्सनातन इति स्मरणात्॥ ॥इत्यमावास्यापूर्णिमा
निर्णयः॥ अथैतासां पूर्वेद्युः परेद्युश्च कियती भिन्नाडी भवतीति संदेहो निर्णीयते। यदाह्यपाति ऽ॥
श्रावण्यामसमुपैति यस्यां तिथिर्मुहूर्तत्रयवाहिनी सा। धर्मस्य कृत्येष्वखिलेषु पूर्वविद्भिस्तिथिः कीर्तित
विबुधैः पुराणैः। तथा पद्मनाभसिरप्याह। पक्षद्वयेऽपि तिथयस्तिथिपूर्वभागे पौत्री त्रिभिर्मुहूर्तैर्वि
शन्ति सामान्यमेव विधिरस्य मत इति॥ चतुर्दशी पञ्चमी च तिथिः षड्भिर्मुहूर्तैर्द्वादशघटिकाभि
स्त्रुश्रीतिथिं विध्यति। दशमी कलयापि उद्धीतिथिमेकादशीं विध्यति। अथ च षोडशपञ्चमुहूर्त
कैः पञ्चदशनाडीभिः स्तुद्धीतिथिं विध्यति। अत्र कालद्वये च एकादश्युपवासः। पञ्चदशघटिका
वेधस्तु व्रतविषयः। यदुक्तं निगमे। सर्वप्रकारवेधाय मुपवासस्य बोधकः॥ सार्द्धसप्तमुहूर्त
वेधस्तु वेधाय वाक्षते व्रतमिति। सर्वप्रकारवेधः कलाघटिकामुहूर्तादिरूपः। तत्र सासमय
त्रयं त्रिमुहूर्तव्यापिनि पूर्वाह्णे केवलमस्तमयात्। सूर्योदयादनन्तरं त्रिमुहूर्तव्यापिनी परेद्युर्यते॥
यतः। सा खण्डतिथिरपि सम्पूर्णा भवति। यदाह देवलः। यां तिथिं समनुप्राप्य उदयं याति भास्करः॥

Indira Gandhi National
Centre for the Arts

सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु। तथा यां तिथिं समनुप्राप्य उदयं याति भास्करः। सा तिथिः
सकला ज्ञेया दैवे पित्र्ये च कर्मणि॥ उपवासे तु यद्यस्तमयात् पूर्वं द्वित्रिघटिकामात्रव्यापिन्यपि पूर्वा
भवति तदा सैवोपोष्या। पंचमी सप्तमी चैव दशमी च त्रयोदशी। प्रतिपन्नवमी चैव कर्तव्या संमुखा
मदन तिथिरिति पोठीनसिना संमुखायाम् एव तिथावुपोषणविधानात्। सायाह्नव्यापिन्यपि द्वितीया
नोपोष्या संमुखत्वाभावात् तस्याः। कैश्चिक्तवैयासंमुखा तिथिः ऋत्ययं न विधिरेव प्राप्तः प्राप्तस्य नूप
त्वाभावात्। तथा उपवासस्य तत्तत्तिथिनिषेधव्रतकल्पेष्वेव विधानात्। नवपूर्वाविद्धा सर्वे
२६ वा वा परविद्धा सं वर्जयेदिति। दिनद्वयसंवेधिनी तिथ्याव्यापकलेनोपवा २६
सप्राप्तेश्च स्वेच्छा पूर्वेद्युः कदाचिदपरेद्युरुपवासः प्राप्नोति। तदनेन प्रकारेण पक्षे प्राप्तस्य नियम
विधिरेव युक्तः। नियमविधेरत्यन्तवादतं तस्यात्। पूर्वस्योपोष्यानपरेति गम्यते। एवं परा वोपोष्या न पूर्वेत्य
भिप्रायः। तस्माद्विलवर्तिका पि सा याह्नेया तिथिः सैव ग्राह्येति सैवोपवासे यावन्निषिद्धा नियमविधिनानेन पूर्वाभि
मान्यव्यापिनी परा तिथिः। यदा तु कर्मकालव्यापिनी तिथिर्न लभ्यते तदा परतिथौ यावान् कालः सह द्वितीयावर्तिनावाल्काले सोहृ
द्विर्वा नदतिथौ कल्प्यते। लिंग कर्मकालव्यापनाय॥ ॥*॥ यदुक्तम्॥ ॥ ॥ ॥

तिथ्यादौ तु न वेधो वाह्न्यासो वृद्धिः परेऽहनि। तावान्त्राह्यः स पूर्वेद्युः सदृष्टोपि स्वकर्मणीति। अस्मिन्
त्वेनपरेऽहनि पूर्वेद्युरिति च निर्देशेन परतिथिः पूर्वा तु पिच्छव्यस्य तेन मुख्य महः। तस्मिन् ह्रासवृद्ध्या
ना राज्यस्यास्मैनवात्। तथा तिथ्यादाविदानं तिथिसंवेध नवह्रासवृद्ध्या कथनाच्च। यदा पुनः
कर्मकालव्यापिनी लभ्यते तदा तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणमिति ह्रासवृद्ध्योः प्रतिब
द्धत्वात्॥ यदा तु परदिनावधितनवृद्धिप्रवेशनापि ह्रस्वत्वात्संपूर्णकर्मकालव्यापिन्यां तिथौ
समस्तकर्मकालव्यापिनी न लभ्यते। तदा ह्रासप्रवेशनापि तिथिः संभवन्त्यपि कर्मकालयोगस्वल्प
भवति मध्यस्थावाह्नी नमवतितदा पूर्वेद्युर्वा परा वेति कर्मकालव्याप्तिनैव निर्णयाभावस्या
वस्थितत्वादेवं निर्धार्य वृद्धिह्रासानिर्णयामावेन सुलभोऽन्यायो। यदा तु ह्रासवृद्धी गृही तयोः किं
चित्कर्मकालव्यापित्वं भवति समग्रकर्मकालव्यापित्वं वा लभ्यते तदा परदिनावधितह्रासवृद्ध्योः
प्रवेशः। यदि समस्तमयात् पूर्वं मुहूर्तत्रयव्यापिनी तिथिरुपादेयत्वमुक्तमेतदमावास्यादिवि

Indira Gandhi National
Centre for the Arts

वि

कार्य्ये दैवे याः पुनः परा उपोष्यत्वेन विहितास्ता घटिकामात्रव्यापिन्योपि परा उपोष्या न पूर्वा तिथिविद्धाः ॥ ॥
तदुक्तं भविष्यपुराणे ॥ व्रतोपवासनियमे घटिकैकापि या भवेत् । सा तिथिः सकला ज्ञेया पित्र्ये चापरा
ह्णिकी ति । गार्ग्योपि दशनाडीभिर्द्वितीयैकादशीभिस्तथा । अतोष्टादशनाडीभिर्दूषयत्युत्तरां तिथिमिति वचनमुप
मदन॰ वासव्यतिरिक्तकर्मविषयम् । अत्र वचने उपवासशब्दस्य वणात् उपवासे तु घटिकामात्रेणापि दूष
यत्युत्तरां तिथिमिति वचनोपपन्नसिद्धत्वात् निषेधस्य । अतः स्वामिकार्त्तिकेयपूजनयद्दानब्राह्मणभोज
नादिकालविशेषविहितकर्म क्रियते तद्धि दशघटिकाभिः पंचम्या विद्धायां षष्ठ्यां न कार्यमित्ययं विषयः
यथा दशम्या पंचदशनाडीभिर्विद्धायामेकादश्यां नारायणमत्स्यादिके न कर्त्तव्यमित्येतद्विषयं तथा २७
२२ चतुर्दश्याष्टादशनाडीभिर्विद्धायाममावास्यायां साङ्केन विषयामिति विषयव्यवस्था । ततश्च न कश्चिद्विरो
धः ॥ इति तिथिनिर्णयसामान्यनिरूपणम् । अथ तिथिषु दैवपित्र्यकर्मकालनिरूपणं क्रियते तथा त्रिधा दिवस
विभागं दर्शयंति श्रुतिः पूर्वाह्णो वै देवानां मध्यंदिनो मनुष्याणामपराह्णः पितॄणां तस्मादपराह्णे ददातीत्यस्याः
सुतेरर्थः त्रिधा विभक्ते दिवसे पूर्वाह्णमध्याह्नापराह्णेषु त्रिषु विभागेषु देवतादिकालानीति ॥

रत्नः ५

मनुरपि द्विधा दिवसविभागमाह ॥ यथा चैवापरः पक्षः पूर्वपक्षाद्विशिष्यते तथा श्राद्धस्य पू
र्वाह्णादपराह्णो विशिष्यते ॥ तथा स्कन्दपुराणे च । आवर्त्तनात्तु पूर्वाह्णो ह्यपराह्णस्तथाप
रडति । तथा मत्स्यपुराणे । मुहूर्त्तैः पंचदशभिर्द्दिवसविभागस्तु यस्मिन्विभागे यत्कर्म दैवीपि
त्र्यं वा विहितं तस्मिन्नेव विहितं ॥ यदाह पित्र्यकर्मविषयकं मनुः ॥ ययास्तं सविता या
तिपितरस्तामुपासते । तिथिं तेष्वपराह्णे हि स्वयं स्वयंभुवा । तथा दैवकर्मणि सैव ग्राह्या यस्या
मभ्युदितो रविः सा तिथिः सकला ज्ञेया विपरीता च पैतृके । विपरीतास्तगामिनी त्वथो
अनयोरुदयास्तमनतिथ्योः सकलत्वं पित्र्यकर्मापेक्षयैवावगन्तव्या । तदुक्तं ब्रह्मणा
दिन । मध्याह्ने वापराह्णे वा यदुक्तं यत्र कुत्रचित् । तस्यां कुर्वीत सद्भावे तिथेस्तत्कर्म नान्य
थेति । यदा दिनद्वयेपि पूर्वाह्णादिव्यापित्वं तिथेस्तथा पक्षस्य वृद्धौ द्वितीया ग्राह्या
ज्ञेये तु पूर्वैव । वर्द्धमानस्य पक्षस्य उदयात्पूज्यते तिथिः । यदा पक्षः क्षयं याति तदा सा
दपराह्णिकी ति बोधायनस्मरणात् । तथा श्राद्धविशेषमुपादाय कालविशेषः स्मर्यते ॥

Indira Gandhi National Centre for the Arts

पूर्वाह्णे दैविकं श्राद्धमपराह्णे तु पैतृकं। एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तिकं। वृद्धिः
पुत्रजन्मसा निमित्तं यस्याभ्युदयिकस्य तत्सर्वमाभ्युदयिकं श्राद्धं सामान्येन वृद्धिनि
मित्तकमुच्यते। केवलं पुत्रजन्मनिमित्तमेव श्राद्धं न भवति। तस्य कालनियमाभावेन
मदन० प्रातः कर्त्तव्यता विधिना संगतेः। अतोन्यनिमित्तं सर्वमाभ्युदयिकं प्रातः पूर्वाह्णे कर्त्त
व्यं। तथा च पुराणवचनं। शुक्लपक्षस्य पूर्वाह्णे रौहिणं तु न लंघयेत्। अत्र पूर्वाह्णे द्विती
येदिनार्द्धमपराह्णः। तथा च पूर्वाह्णे सकलमाभ्युदयिकं श्राद्धं कर्त्तव्यं दिनद्वितीयार्द्धे अ
पराह्णे कर्त्तव्यं। यत्तु पूर्वाह्णो वै देवानामित्यादिश्रुतौ दिनस्य त्रिभागमभिधाय तृतीय २८
२८ भागः पितृकार्यकाल इत्युक्तं तत् पिंडपितृयज्ञार्थं पिंडान्वाहार्यकश्राद्धविषयं। पिंडपि
तृयज्ञार्थं करणापठितत्वात्। तथा च छंदोगपरिशिष्टे कात्यायनवचनं। पिंडान्वाहा
र्यकं श्राद्धं क्षीणे राजनि शस्यते। वासरस्य तृतीयांशे नातिसंध्यासमीपतः इति। अस्मा
देव वचनात् संध्यासमीपे राक्षसवेला यामकरणामेव। ततस्तान्यस्य कलमपि पार्वणी

दिनद्वितीयार्द्धे अपराह्णः शब्दवाच्य उपक्रमणीयं। सर्वोपक्रमकालः कुतपः तस्य दि
नमध्यत्वात्। सप्तमात् परतो यस्तु नवमाद्वै वरस्तु यः। उभयोरपि मध्यस्थः कुतपः सोभि प:
धीयत इति। तथा वायुपुराणे। कुंजरे गोपतिर्गोभिः कालेन तपति ज्ञाः। स कालः
कुतपस्तत्र पितॄणां दत्तमक्षयं। तस्मिन्कुतपकाले श्राद्धमारंभणीयं। यदाह गौतमः।
आरभ्य कुतपे श्राद्धं कुर्यादारौहिणं बुधः। विधिज्ञो विधिमास्थाय रौहिणं तु न
लंघयेत्।। रौहिणं लंघयेद्यस्तु ज्ञानतोऽज्ञानतोपि वा। आसुरं तद्भवेच्छ्राद्धं पितॄणां
नोपतिष्ठते।। नवमो मुहूर्त्तो रौहिणः। एकोद्दिष्टस्य पितृत्वेपि तन्मध्याह्ने एव क
र्त्तव्यं।। यदाह पराशरः।। पूर्वाह्णे दैविकं कार्यमपराह्णे तु पैतृकम्। एकोद्दिष्टं तु
मध्याह्ने प्रातर्वृद्धिनिमित्तकं। अत एव यद्व्यवस्था।। रौहिणं तु न लंघयेदिति वचनेन न
रौहिणं नवमं मुहूर्त्तं नातिक्रामेत्। तत्रैव श्राद्धं समापनीयमित्येतदर्थपरा
दिवसद्वितीयभागएवापराह्णो गृह्यते। दिवसस्य तृतीयचतुर्थभागे वाऽपराह्णे

Indira Gandhi National
Centre for the Arts

मागो॥ अस्यार्थस्यानुपपत्तेः॥ तयोर्मध्ये कुतपरौहिणयोरभावात्॥ अतो द्विधा
विभक्ते दिने अपराह्णमध्यवर्त्तिन्यां कुतपाद्यघटिकायां मध्याह्नत्वेनैकोद्दिष्टमा
भागीयं॥ यदुक्तं मत्स्यपुराणे॥ अपराह्णे तु संप्राप्ते अभिजिद्रौहिणोदये॥ यत्कि
ञ्चिद्दीयते तत्र तदक्षयमुदाहृतं॥ अभिजिदष्टमो मुहूर्त्तः कुतपः नवमो रौहिणः॥ ४।
मदन० एतदपि वचनं दिवसस्य द्विधा भागे एव घटते॥ एवमन्येषामपि मुनिवचनानाम
न्यथाप्रतिभासमानानां कुतपरौहिणवचनेनाविरोधो व्याख्येयः॥ ननु यदिदं
कुतपरौहिणकाले श्राद्धविधानं तदेकोद्दिष्टश्राद्धविषयमनाग्निकश्राद्धवि २७
२७ षयं वा भवतु। अतो न कश्चिद्विरोध इति चेत् मैवं भाषिष्ठाः। यदुक्तमनाग्निक
श्राद्धविषयमस्त्विति तदसमंजसं॥ पिंडान्वाहार्यकश्राद्धव्यतिरिक्तपार्वणश्राद्ध
करणे साग्नेरप्यत्यन्तप्रशस्तकुतपरौहिणकालपरित्यागकारणाभावात्॥
एकोद्दिष्टविषयत्वमप्ययुक्तं। अमावास्यायां पार्वणश्राद्धमपि कुतपकालस्यैवाद्येन स्मरणात्॥

यदाह हारीतः। भूतविद्धाप्यमावास्या प्रतिपन्मिश्रितापि वा। पितृकर्मणि विद्वद्भिर्ग्राह्या कु
तपकालिकी मता॥ तथा कुतपरौहिणयोश्चतुर्दशीसद्भावे भूताष्टदशनाडीभिर्दूषयत्युत्तरां तिथिमिति॥
अमावास्यायां श्राद्धप्रतिषेधाच्च॥ तथा वचनांतरं च॥ मध्याह्नात्परतो यत्र चतुर्दश्यनुवर्त्तते। सिनीवाली
ति साद्दृष्टा पित्र्यकर्मणि निःफला इति। ननु ततो निवृत्ते मध्याह्ने कृतस्नानः समागतान् द्विजान्। अभिगम्य य
थामार्गं प्रयच्छेद्दन्तधावनं। तैलमुद्वर्त्तनं स्नानं पानीयं च पृथक् पृथक्। पात्रैरौदुंबरैर्दद्याद्वैश्वदेविक
पूर्वकं। ततः स्नानान्निवृत्तेभ्यः प्रत्युत्थाय कृतांजलिः। पाद्यमाचमनीयं च संप्रयच्छेद्यथाक्रममित्यत्र
स्मृतिवचने तानि मध्याह्नकाले दन्तधावनादिकं कृत्वानंतरं ब्राह्मणेभ्यः पाद्यमाचमनीयं च दद्यादि
ति श्रुतीनां एव कुतपरौहिणकाले पार्वणश्राद्धोपक्रमाभिधानात् कुतपरौहिणयोरेकोद्दिष्टविषय
तास्तीति चेत्॥ अत्र ब्रूमः॥ श्राद्धमुपक्रम्यातु त्याय प्रकुर्वीत धावनं। श्राद्धकर्त्ता न कुर्वीत दंतानां धावनं बुधः
तैलमुद्वर्त्तनं स्नानं दद्यात्पूर्वाह्णे एव तु। श्राद्धभोक्ता न खादेत्तु दंतधावनं कारयेदिति वचनेन प्रातरेव

Indira Gandhi National Centre for the Arts

रत्नयावनादिविचारात्॥ ततो निष्पन्ने मध्याह्ने इति यत् निःपन्ने मध्याह्ने इत्यकारप्रश्लेषेणाप्यभिमु
ख्यात्वं तत्र्यान्तेर्जल्पितमित्युपपन्नंशायी। तस्मात्सामेरागेः सर्वस्याः विमध्याह्नांतर्गतायां कुतपाद्याद्व
टिकायामेकोद्दिष्टारंभः। अपराह्णांतर्वर्तिन्यां कुतपाद्यघटिकायां पार्वणस्यारंभ इति सिद्धं। प्रागुक्तमु
मुख्यकालासंभवे कुतपमुहूर्तादुपरितनं मुहूर्तचतुष्टयं श्राद्धतिथौ सत्यां ग्राह्यं॥ तदुक्तौ द्वद्वमुहूर्ते
मदन० कुतपाद्यं मुहूर्तचतुष्टयं। मुहूर्तपंचकं ह्येतत्स्वधाभवनमिष्यत इति। योयस्य विहितः कालः कर्मणस्त
स्तदुपक्रमे। विद्यमानो भवेदंगानो कितोपक्रमेणतु। तथा रात्रौ श्राद्धं न कुर्वीत राक्षसी सा हि कीर्ति
ता। संध्ययोरुभयोश्चैव सूर्ये चैवाचिरोदिते। त्रिमुहूर्ते तु सायाह्ने तत्र श्राद्धं विवर्जयेत्। उपसंध्यं न ३०
३० कुर्वीत पित्र्यं जांकथंवन। रात्रौ श्राद्धं न कुर्वीत राहोरन्यत्र दर्शनात्॥ सूर्योदयमुहूर्ते तु संध्यायो
रुभयोस्तथा। इत्यादिस्मृतिपुराणवचनानिवनानिवचनकुतपरोहिणकालोक्तश्राद्धस्य राघ्या
दिषु असंभवादेव प्रतिषेधात्सिद्धमुखरोहिणकालाद्याद्यकालांतरविधिप्रतिषेधकालबद्धियाद्ध॥



स्यादितिज्ञायते। अतोयस्यामस्तंयातीतिकुतपादिमुहूर्तपंचकव्यापिनी तिथिरपि तत्र सुणासत इति चेत्
नार्थः। नत्वस्तमयमात्रव्यापिनी। त्रिमुहूर्ते तु सायाह्नेस्तत्र श्राद्धं विवर्जयेदस्तमयसमये श्राद्धप्राप्ती
वात्। अपराह्णेपि श्राद्धतिथ्यभावे श्राद्धं न क्रियत एव। तथासति तामुपासत इत्यसंगतं स्यात्। अतोस्त
मयशब्देन गौण्या वृत्त्या षडितिवत्समीपलक्षणया अपराह्णो लक्ष्यते। तथा च यत्र प्रत्यस्तमयसंबंधिन्यां ति
थौ श्राद्धविधानं तत्र सर्वत्रापराह्णव्यापिन्यां तिथौ विहितमित्यवसेयं। प्रतिसंवत्सरश्राद्धमपि कृष्ण
वर्मानुसारेणैकोद्दिष्टवत्कुतपघटिकामारभ्य मध्याह्नतिथौ सत्यां कर्तव्यं। पार्वणं तु कुतपात्प्राग्घटिका
मारभ्य कर्तव्यं। तस्यैव कालस्यातिप्रशस्तत्वोक्तेः। ननु दर्शेषपोष्ठिमासेव पितुः संवत्सरे दिने। पूर्वविद्ध
मकुर्वाणो नरकं प्रतिपद्यत इति वचनेन पूर्वविद्धायां तिथौ प्रतिसंवत्सरश्राद्धं विधीयते। तत्कथम
सामान्येन कुतपादिमुहूर्तव्यापिन्यां तिथौ विधानं। वचनार्थानवगतेः पूर्वविद्धमिति दिवसपूर्वार्ध
मात्रव्यापिन्यां पूर्वतिथावित्यर्थो विवक्षितः। नत्वस्तमयवेलायां कलामात्रव्यापिन्यां तिथौ। सैव ह्यपराह्णिके

Indira Gandhi National Centre for the Arts

श्राद्धेनापरापुत्रहानिदेतिबाधबलादस्तमयकालव्यापिनी या तिथिः सैव ग्राह्या द्विके श्राद्धे रात्रौ तु योगोस्ति चेत्॥
तदा वचनबलादस्तमयसमये एव श्राद्धप्रसंगः। यदि संध्याकाले तत्समीपे श्राद्धं प्रतिषिद्धमिति तन्निमित्तका
लेन विधीयते तदापराह्णकालेऽन्यतिथेरभावेन श्राद्धस्य करणे न सैव ग्राह्या द्विक इति विहिता एव ग्रसणात्॥
नापरापुत्रहानिदेति। प्रतिषिद्धायामपरस्यां तिथौ विधानेव स्यात्। यां तिथिं समनुप्राप्य अस्तं याति दिवाकरः
मदन० इत्यादिवचनोक्तासु संबंधीन्यास्तिथेः संपूर्णत्वाभिधानात्। यदा कादिकृतं कर्म विहितं तिथौ वेदकृतं स्यादिति वेत्॥
मैवं। यथास्तमयसमययोगेन पूर्वदिने तस्याः संपूर्णत्वं तथैवपरदिनेपि उदयसंबंधयोगेन यां तिथिं समनुप्राप्य
उदयं याति भास्करः इत्यादिवचनेन संपूर्णत्वकथनेनास्तमयवेलायां दिनद्वयेपि तिथिसद्भावे न सैव ग्राह्या द्वि ३१
३१ क इति पूर्वापरा वा का तिथिर्विधीयत इति न ज्ञायते। न तत्रापि पुत्रहानिदेति का वा प्रतिषिध्यते। इत्यपि न ज्ञायते।
तथा यदि वचनपरिभाषितं अवास्तवो तिथीनां संपूर्णत्वं एतेतदा सर्वासामपि उदयास्तमयसंबंधेन संपूर्णत्वेन सर्व
कर्मकालव्यापित्वाद्यापस्य विहितः कालस्तत्कालव्यापिनी तिथिरिति मध्याह्नव्यापिनी या स्यात्सैकोद्दिष्टे तिथिर्भवेत्।
अपराह्णव्यापिनी या तु पार्वणी सा तिथिर्भवेदिति च वचनजातं व्यावर्तनीयाभावान्निरर्थकं भवेत्। अतोऽस्तमय
वेलायां मिलनस्य वचनस्यायमर्थः॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ श्रीरामः॥ ॥

अग्निदिनमध्याया सा... वेलास्तसमीपवर्तीकालः सायाह्नस्त्रिमुहूर्तः पंचमो भागस्तस्य प्रवेशे
यास्वल्पाल्पास्ति सैव प्रातः संवत्सरश्राद्धे ग्राह्या। तस्याः श्राद्धयोग्यकुतपादिमुहूर्तपंचकरूपापरा
ह्णव्यापित्वात्। इतरा पूर्वा या सायाह्नमात्रं व्याप्य वर्तते। श्राद्धयोग्यमपराह्णं न व्याप्नोति सा पुत्र
हानिं ददातीति ततो नोपादेयेत्यर्थः। अयमेवार्थः स्फुटं कृतः स्मृत्यंतरे। अपराह्णः पितृणां तु या
पराह्णानुयायिनी ति। यद्यपि विचार्यते यदि दिने प्राप्तः संवत्सरस्य श्राद्धतिथिर्न प्राप्यते पूर्वा तु कुत
पकालमात्रं व्याप्य वर्तते तदा सैव पूर्वा ग्राह्या। सकलश्राद्धयोग्यकालव्यापनात्। यदा तु श्राद्ध
से प्रवर्तमाने पूर्वापरयोरुभयोरपि दिनयोः कुतपरौहिणमुख्यकालं श्राद्धतिथिर्न लभ्यते तदा
पूर्वा अमुख्यकालसंबंधिनी ग्राह्या। तिथिवृद्धौ तु दिनद्वयेपि मुख्यकालसंबंधे पूर्वैव श्राद्ध
तिथिर्ग्राह्या। सकलकालव्यापनात्। आमश्राद्धं तु देशकालानुरोधेन पाकाद्यसंभवे द्विजः पूर्वा
ह्णे कुर्वीत। यदाह शातातपः। आमश्राद्धं तु पूर्वाह्णे एकोद्दिष्टं तु मध्यतः। पार्वणं चापराह्णे तु प्रा
तर्वृद्धिनिमित्तकं। यत्तु। मध्याह्नात्परतो यस्तु कुतपः समुदाहृतः। अमंत्रेणापि तत्पितृणां दत्तमज
यमिति।

Indira Gandhi National Centre for the Arts

तथा। आमश्राद्धं तु मध्याह्ने एकोद्दिष्टं तु मध्यतः। पार्वणं चापराह्णे तु प्रातर्वृद्धिनिमित्तकमिति हारीतवचनी॥
तच्छ्राद्धे विषयः। तस्य मुख्यत्वोहि। आकृत एकाल एव आमश्राद्धविधानात्॥ इति श्राद्धकालनिर्णयः॥ ॥
एवं श्राद्धप्रसंगाद्वृद्धांतर विषयोपि संदेहो निरस्यते। नवश्राद्धमासिकसपिंडीकरणानि एकोद्दिष्टानि
मदन॰ कं यत्कृतं श्राद्धं तत्स्वस्वद्व्यतिरमाह। त्यविभक्तेर विभक्तैर्भ्रातृभिर्ज्येष्ठं पुरस्कृत्य कर्मवश्राद्धं
कार्यं न पृथक्स्वियं। ततान्यपि प्रतिसंवत्सरादिश्राद्धमधास्तु विभक्तास्तु पृथगेव श्राद्धं कुर्युः। अय
मेवार्थः स्पष्टीकृतः स्मृत्यंतरे॥ नवश्राद्धं सपिंडत्वं श्राद्धान्यपि च षोडश। एकेनैव तु कार्याणि सवि
३२ भक्तधनेष्वपीति। तथा॥ विभक्ता वा विभक्ता वा स्वकुर्युः श्राद्धमूर्ध्वतं मघासु च ततो न्यत्र नाधिकारः ३२
पृथग्विना॥ विभक्तास्तु पृथक्कुर्युः प्रतिसंवत्सरादिकं। एकेनैवाविभक्तेषु कृतं सर्वैः कृतं भवेत्॥
न्यायाद्विनागानामेको धर्मः प्रवर्तते। विनागेसाति धर्मोपि भवेत्तेषां पृथक्पृथक्। सर्वैरनुमतिं
कृत्वा ज्येष्ठेनैव तु यत्कृतं। द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेदिति॥ अथ नांदीमुखश्राद्धविषय
संदेहोपि दूरीक्रियते। तत्र यदा पिता स्वसुतसंस्कारानि तदा नांदीश्राद्धानि स्वपितृभ्यो दद्यात् सुताद्यविवा
हावधि। यदा तु पितुरभावे अन्यो भ्रात्रादिः संस्करोति तदा पितृक्रमतः श्राद्धं दद्यात्॥ ॥
तथा च स्मृतिः। स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु। पिंडानोद्वहनं तेषां तस्याभावे तु तत्क्रमात्॥
अत्र पिंडशब्देन श्राद्धं लक्ष्यते। पिंडदानसहस्वेषामुद्वहनादित्यत्राऽभिविधौ॥ तथा च स्मृत्यंतरे पि॥
नांदीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे बुधः। अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नांदिकं॥ तथा च स्मृत्यंतरे॥
पित्रा सुजीवता पुत्रः कुर्युतदारसंग्रहे। पितुर्नांदीमुखं प्रोक्तं न पुत्रस्य कथंचनेति॥ तथा च वचनांतरे॥
कन्यापुत्रविवाहेषु प्रवेशे नववेश्मनः। नामकर्मणि बालानां चूडाकर्मादिके तथा॥ सीमंतोन्नयने चै
व पुत्रादिमुखदर्शने॥ नांदीमुखे पितृगणान्पूजयेत्प्रयतो गृही॥ यदा तु पिता जीवति देशांतरगतः
पतितो वा कुतश्चिदनधिकारी तावा भवति अन्य एव तत्सुतसंस्कारानि जातकर्मादिकर्माणि तदा तस्यापि तु ये पि
तृभ्यो नांदीमुखं दद्यात्॥ यदुक्तं स्मृत्यंतरे। पितरो जनकस्य ज्यायाव बहुतमनोहिते। समाहितत्वतः
पश्चात्स्वान्ययेत पितामहानिति। यदा तु जीवपितृकः स्वसुतसंस्कारानि तदा मातृमातामहसां विभि
श्राद्धद्वयमेव कुर्यान्न पितृणां नांदीमुखं। सपितुः पितृकस्य तेषु अधिकारो न विद्यते। न जीवंतमति
क्रम्य किंचिद्दद्यादिति श्रुतेरिति कात्यायनवचनात्॥ तथा कात्यायनः॥ स्वसुतजीवपितृकस्य

Indira Gandhi National
Centre for the Arts

हामन्त्रमनाग्नेर्जीवतिसाग्निकस्यापिविद्यमानपितृकस्यापितृयज्ञानामनारंभमुद्दिशति॥ जीवत्पितृ
कस्यव दिसाद्धनजीवंतमतिक्रम्यदद्यादितिप्रतिप्रसवमाह॥ यत्तु उद्वाहे पुत्रजननेपित्र्येष्टौ
सोमिकेमखे॥ तीर्थेब्राह्मणआयातेषडेतेजीवतःपितुरितिमैत्रायणीयपरिशिष्टवचनं॥ त
त्रछन्दोगव्याख्यायिनासाग्निनामवतिबोद्धव्यं॥ नजीवत्पितृकःकुर्याच्छ्राद्धमग्निमृतेद्विजः॥ येभ्य
मदन॰ एवपितादद्यात्तेभ्यःकुर्वीतसाग्निकः४॥ पितामहेष्वेवमेवंकुर्याज्जीवतिसाग्निकः॥ साग्निको
पिनकुर्वीतजीवतिप्रपितामहे। तस्मात्पारस्करवचनाधिपर्यालोचनया। पितरिजीवतिमृतरि
३३ जीवेत्पामकमेवमातामहश्राद्धं। त्रिष्वपिपितृमातृमातामहेषुविद्यमानेषुकात्यायनमतेसा ३३
ग्निकस्यानग्निकस्यापिनास्त्येवनांदीमुखश्राद्धं। मातरएवपरंपूज्याःइतिस्मृतेः॥ ॥इतिश्रीक
हारमल्लेत्यादिविरुदराजीविराजमानश्रीमदनपालविरचितेधर्मनिर्णयसारेनांदीमुखश्राद्ध
निर्णयः४॥ ॥अथामावास्यापौर्णमास्योःश्राद्धकालनिरूपणं॥ तत्रामावास्यापौर्णमास्योःश्राद्ध
विधानपरेतन्ननम्॥ अमावास्यायथापुण्यापितृपित्र्यादिकर्मणि॥ ॥

पौर्णमासीतदापुण्याविशेषास्तिनकश्चन॥ कलासंपूर्णताद्योजसोमस्यान्तावपूर्णिमासप्ता
पूर्णेकलेसोमेपरितोष्यायंतिवा॥ तथाव्याघ्रपादः॥ ननिर्वपतियःश्राद्धंप्रमीतपितृको
द्विजः॥ इंदुक्षयेमासिमासिप्रायश्चित्तीयतेतुसः॥ इति॥ अमावास्यादिधावतुर्दशीविद्धाप्रति
पन्मिश्रितावा। यस्यामुदयात्पूर्वंचंद्रोदृश्यते सासिनीवाली यस्यांद्वितीयायांप्रतिपन्मि
श्रितायांचंद्रोनदृश्यतेसाकुहूरिति॥ यदाहव्यासः॥ दृष्टचंद्रासिनीवालीनष्टचंद्राकुहूः
स्मृता॥ सिनीवालीकुहूश्चैवदैवेपित्र्येचकर्मणीति॥ दर्शेचपौर्णमासेचपित्रोःसांवत्स
रदिने॥ पूर्वविद्धमकुर्वाणोनरकंप्रतिपद्यते॥ तथाभूतविद्धाप्यमावास्यामोहाद
ज्ञानतोपिवा॥ श्राद्धकर्मणियेकुर्युस्तेषामायुःप्रहीयते॥ परस्परविरोधिवचनजातं
दृश्यते॥ अतोव्यवस्थाभिधीयते॥ भूतविद्धाप्यमावास्याप्रतिपन्मिश्रितापिवा॥ पि
त्र्यकर्मणिविद्वद्भिर्ग्राह्याकुतपकालिकीति॥ तथावचनांतरं॥ मध्याह्नव्यापिनीया
तुतिथिःपूर्वापरापिवा॥ तदहःकर्मकुर्वीतह्रासवृद्धीनकारणमिति॥ अत्रवा

Indira Gandhi National
Centre for the Arts

वनेकुतपकालेमध्याह्नःतस्यैवाहोमग्मत्वात्।अतःकुतपकालव्यापिनीपूर्वापरावा॰
मावास्याग्राह्या।ग्राह्याकुतपकालिकेतितस्याएवाभिधानात्।यदातुचतुर्दशीकुत॰
पकालमप्यतिक्रम्यवर्त्ततेसापितृकर्मणितात्र्यैव।मध्याह्नात्परतोयत्रचतुर्दश्यनुव॰
र्त्तते।सिनीवालीतुसाज्ञेयापितृकार्येतुनिःफलेति।यदातुतिथिवृद्ध्यादिवसद्वय॰
मदन॰ पिकुतपकालव्यापिन्यमावास्यालभ्यतेतदाकुहूरितीयाग्राह्या।तदाहजबेताः॥
सिनीवालीकुहूश्चैवसुतुल्येसाङ्गकर्मणि।स्यातांतेयदिमध्याह्नेऽऽद्यादिस्यात्कथं
तदा॥तिथिक्षयेसिनीवालीतिथिवृद्धौकुहूःस्मृता॥साम्येपिचकुहूःज्ञेयाचेदखर्वदी ३४
गवद्विभावितिति।यदाकुतपोत्पघटिकामात्रम्यसिनीवालीप्रवर्त्ततेकुहूश्चकुतपप्र॰
३४ र्वघटिकामात्रव्यापिनीतदापिसाङ्गेकुहूरेवग्राह्या।साङ्गारंभयोग्यकुतप॰मावा॰
स्यासंभवात्।यदिदंसाम्येकुहूःसाङ्गविधानंतदिदंनिरग्निकब्राह्मणस्त्रीशूद्रविषयम्॥
यदुक्तं।सिनीवालीद्विजैःकार्यासाग्निकैःपितृकर्मणि।स्त्रीभिःशूद्रैःकुहूःकार्यात॰

याचानग्निकैर्द्विजैरिति॥तथाव्यासवचनंदृष्टव्यं।सिनीवालीकार्याविप्रैस्तुसाग्निभिः।
नष्टचंद्राकुहूःशूद्रैर्विप्रैश्चैवनिरग्निकैः।यदितुतिथिक्षयेदिनद्वयेऽमावास्याकुतपं
नव्याप्नोतितदासर्वैरेवसिनीवालीग्राह्या।तिथिक्षयेसिनीवालीतिस्मरणात्।य
त्तुवचनंत्रिमुहूर्त्तापिकर्त्तव्यापूर्वातदर्शातुबह्वृचैः।कुहूश्चयजुर्भिःकार्यायथेष्टंसामगीति
भिरितितत्कुतपकालादिसाङ्गविधायकबहुस्मृतिविरुद्धत्वान्मूलभूतस्मृत्यभावाच्चोपेक्षणी
यमिति।अमावास्यासाङ्गकालनिर्णयेनैवपौर्णमासीसाङ्गकालनिर्णयोपिव्याख्या
तोवेदितव्यः॥॥अमावास्यापौर्णमासीसाङ्गकालनिर्णयः॥यदिदमग्निमतोद्विजस्य
मावास्यायामपराह्णेविहितपिंडपितृयज्ञानन्तरंपिंडान्वाहार्यकंश्राद्धंविहितंतद्दर्श
कालसंदेहापिव्युदस्यते॥तत्रमनुः॥पितृयज्ञंतुनिर्वर्त्यविप्रश्चन्द्रक्षयेऽग्निमान्।पिंडान्वा
हार्यकंश्राद्धंकुर्यान्मासानुमासिकं।तथामत्स्यपुराणे।पितृयज्ञंतुनिर्वर्त्यतर्पणार्थं
न्तुयोग्निमान्।पिंडान्वाहार्यकंकुर्याच्छ्राद्धमिन्दुक्षयेसदेति।उभयोरपिवचनयोः

Indira Gandhi National Centre for the Arts

पितृयज्ञशब्दः पंचमहायज्ञोत्तभूतिदेवयज्ञभूतयज्ञानंतरं पितृभ्यः स्वधा नम इति यः पितृय
ज्ञो विधीयते तद्वाचपरः। तेन सायं पितृयज्ञात्प्रागेव वैश्वदेवतार्थं कर्मेत्युक्तं भवति॥ तथा च
भविष्यपुराणे। मासीते कर्म निर्वर्त्य वैश्वदेवं च साग्निकः। पिंडयज्ञं ततः कुर्यात्ततोऽन्वाहार्य
कं बुध इति। अथवा पिंडपितृयज्ञवाचा पितृयज्ञशब्दः। तथा च स्मरणं। अर्द्धचतुर्दशी यत्र
मद्न॰ परपंचदशी भवेत्। चतुर्दश्यवसाने तु पितृयज्ञं तु कारयेदिति। अत्र महायज्ञरूपस्य पितृ
यज्ञस्य चतुर्दश्यंतेऽवश्यकर्तव्यता भावात् पिंडपितृयज्ञः पितृशब्देनाख्यते। तस्यैवाद्य य्यु
कर्तृकत्वेन कारयेदिति निजार्थः संगच्छते। ततश्चतुर्दश्यवसाने ज्ञीणो वंड्पिंडपितृयज्ञस्य ३५
३५ रनन्तरं च पिंडान्वाहार्यकं श्राद्धं कर्त्तव्यं॥ तथा च वृद्धो गपरिशिष्टे कात्यायनः। पिंडान्वा
हार्यकं श्राद्धं ज्ञीणराजनि शस्यते। वासरस्य तृतीयंशे नातिसंध्यासमीपतः। तथा च वनं
तरं च। यदा चतुर्दशी यामं तुरीयमनुपूरयेत्। अमावस्या ज्ञीयमाणा तदैव श्राद्धमिष्यते॥
अष्टमेशे चतुर्दश्याः ज्ञीणो भवति चंद्रमाः। अमावास्याष्टमेंशे च पुनः किल भवेदणुः॥

घड्मानो ममावाश्या लज्जुयद्यपरेहनि। यामांस्त्रीनधिकांश्चापि पितृयज्ञस्ततो भवेत्। न तु आगुरू
वचनेन चंद्रक्षये पिंडपितृयज्ञो विधीयते तद्वा आपस्तंबवचनेन विरुध्यते। यदहः चंद्रमसं न पश्यंति तदहः पिंड
पितृयज्ञं कुर्यादित्यनेन चंद्रक्षये पिंडपितृयज्ञो विधीयत इति। तन्न। अर्द्धचतुर्दशी यत्रेत्यादिवचनेन चंद्रदर्श
नेऽस्त्येव पिंडपितृयज्ञविधानात्। आपस्तंबवचनं चंद्रक्षयपरतयैव योजनीयं। अन्यथा स्मार्तस्य तस्याग तत्सोम
म नालमिव दृश्यते। अपराह्णे ज्ञयस्तस्यां पिंडानां करणं ध्रुवमिति हारीतवचनविरोधस्यात्। तस्माच्चंद्रक्षये पि
ंडपितृयज्ञस्तदनंतरं च पिंडान्वाहार्यकं श्राद्धमिति सिद्धं। तथा च श्रुतिः। एष वै सोमो राजा देवानामन्नं यच्चंद्रमाः
स एतां रात्रिं ज्ञीयते तस्मिन् ज्ञीने ददातीति। स वा अपराह्णे ददाति पूर्वाह्णो वै देवानां मध्यंदिनो मनुष्याणामपराह्णः
पितॄणां तस्मादपराह्णे ददातीति नह श्रुतिद्वयेन चंद्रक्षयापराह्णलक्षणकालद्वये पिंडपितृ
यज्ञविधानपरेणापराह्णे ज्ञयस्तस्यामिति वचनेन संगतार्थमिति गम्यते। ततश्चापस्तंबवचनेनापि यदहः स्वं
द्रयो न भवति तस्मिन्नहनि पिंडपितृयज्ञ इत्ययमर्थो नियेतः। तस्मात्पिंडपितृयज्ञानंतरं पिंडान्वा

ह्यर्थकं श्राद्धमिति सिद्धम्॥ इति तिथिनिर्णयसारे पिंडान्वाहार्यकश्राद्धनिर्णयः॥ अतः परं दर्शपौर्णमासेष्टिका
लो निर्णीयते। तत्रादित्यचंद्रयोर्यः परमः संधिः स अमावास्या अतिविप्रकर्षस्तु पौर्णमासः। यदाह गोभिलः॥ ॥
राकावानुमतिश्चैव पूर्णिमासी द्वयं विदुः। राका संपूर्णबिंबा स्यात्कलोना नुमतिः स्मृता। श्रुतिरपि॥ या पू
मदन० र्णिमासी सानुमतिर्योत्तरा सा राका। अमावास्यापि द्विधैव सिनीवाली कुहूश्चेति। या चतुर्दशी विद्धा सा सि
नीवाली या प्रतिपन्मिश्रिता सा कुहूः। अत्र श्रुतिः॥ या पूर्वामावास्या सा सिनीवाली योत्तरा सा कुहूरिति।
तत्र चंद्रादित्ययोरतिसन्निधौ अतिविप्रकर्षे यामुख्ययोः कालयोरल्पत्वात्प्रज्ञातौ उपवस्तव्यौ पञ्चादयो
३६ यष्टव्या इत्यादि मुख्यत्वेऽतिकृत्ये तौ कालावसंभवतः तदनुष्ठानयोग्यः संधिकालो लक्ष्यते। यदाह गोभिलः। प ३६
र्वान्तावुपवस्तव्यौ पञ्चादयो यष्टव्या इति। अत्र पर्वान्तौ पौर्णमास्यमावास्ये उपवस्तव्ये पञ्चादयः प्र
तिपदस्ता यष्टव्याः। स च यागकालः शातातपेन दर्शितः। पर्वणो यश्चतुर्थोंऽश आद्याः प्रतिपदस्त्रयः। यागका
लः स विज्ञेयः प्रातर्युक्तो मनीषिभिरिति॥ ॥ तथा यज्ञपार्श्वेऽप्याह॥ ॥ पंचदश्याः परः
पादः पञ्चादेः प्रथमास्त्रयः॥ कालः पार्वण यागे स्यादन्यथा तु विपद्यते॥ ॥ तथा श्रुतिरपि॥ ॥

॥ तथा श्रुतिरपि॥ संधिमभितो यजेतेति। अभित उभयतः समीपकालो लक्ष्यते। तत्र पर्वसं
धिकालभेदेन यागकालो व्यवस्थाप्यते। यदा संपूर्णा पूर्णिमाऽमावास्या वा प्रतिपदपि प
धिका लभ्यते न यागकालो व्यवस्थाप्यते यदा पुन
रतः पूर्वं तदा पर्वण्यन्वाधानं कृत्वा प्रतिपद्यपि याग इति न कापि विप्रतिपत्तिः। यदा पुन
मध्याह्नात्पूर्वं वा पर्वप्रतिपदोः संधिर्भवति। तदा पूर्वदिनेऽन्वाधानं कृत्वा तस्मिन्नेव
दिने यागः॥ यदाह गोभिलः। आवर्तने यदा संधिः पर्वप्रतिपदोर्भवेत्। तदहर्यागः
आपतपरतस्त्वपरेऽहनि॥ तथा॥ पर्वप्रतिपदोः संधिर्यदागावर्तनाद्यदि। तस्मिन्नहनि यष्टव्यं
पूर्वेद्युः स्यादुपक्रम इति। तथा गोभिलोऽप्याह॥ आवर्तनात्परः संधिर्यदि तस्मिन्नुपक्रमः।
परेद्युरिष्टिः स्यादेव पर्वद्वयविनिर्णयः॥ तथा लौगाक्षिरपि। पूर्वाह्णे वाथ मध्याह्ने यदि
पर्व समाप्यते। उपोष्य तत्र पूर्वेद्युस्तदहर्याग इष्यते। यदा त्वपराह्णे रात्रौ वा पर्वसंधि
पद्यः संधिस्तदा तस्मिन्नहन्यन्वाधाय परेऽहनि यागः कर्तव्यः। तदुक्तं। अपराह्णे
थवा रात्रौ यदि पर्व समाप्यते। उपोष्य तस्मिन्नहनि श्वोभूते याग इष्यत इति। दर्श

Indira Gandhi National
Centre for the Arts

पौर्णमासयागयोः समानमेतत्॥ यदाह आपस्तम्बः। यदहः पुरस्ताच्चन्द्रमाः पूर्णा उत्सर्प्पेत्तां पौ
र्णमासीमुपवसेत। अपूरितेन वा रवर्द्धिकां वाजसनेयिनः समामनन्ति। यदहर्न दृश्येत तां
अमावस्यां स्वान दृष्ट्वा इति वा। अत्र पूर्णश्चन्द्रमा उत्सर्प्पेत उदियात् यस्मिन्नहनि तां पौर्ण
मासीं एकाख्यामपराह्णसंधौ पूर्वसंधौ वा उपवसेत्। पूरितेन वा परस्मिन्नहनि यदा
कापूर्णिः भवति तदा पूर्वाह्णसंधौ मध्याह्णसंधौ वा पूर्वामनुमत्याख्यां पौर्णमासीमुपव
मदन० सेत। यदहर्न दृश्येत यस्मिन्दिने चन्द्रमा दृश्येत तामावास्यामुपवसेत्। यदाह भाष्य
कारः॥ अपराह्णे वा रात्रौ यदि पर्वसमाप्यते। उपोष्या तत्र कार्या स्यात् सा पूर्णि
सा सिनीवाली ज्ञेया॥ पूर्वाह्णे वाथ मध्याह्णे यदि पर्वसमाप्यते। उपोष्यानुमतिस्तत्र सा ऽ ३७
३७ परिकल्प्या॥ अपराह्णे अपायां वा पर्वसंधिर्भवेद्यदि। उपोष्या तु कुहूस्तत्र यदहर्न
तिला॥ पूर्वाह्णे वाथ मध्याह्णे पर्वसंधिर्यदा भवेत्। तत्रापोष्या सिनीवाली स्वान
दृष्टः नला॥ यदा बहुघटिकान्यूनदिवसे अपराह्णे पर्वसमाप्यते परदिने च प्रतिप

दिषड्घटिकात्मकयोगो भवति द्वितीयायां च षडेकघटिकात्मकोऽपि तदामावास्यायां प्रातःकाले पर्वतृतीयां
